# विंशः पाठः

## श्रमस्य महत्त्वम्

''श्रम एव जयति'' इति अस्माकं ध्येयवाक्यम् अस्ति। श्रमेण राष्ट्रस्य उन्नतिः भवति। श्रमेण अर्जितं धनं श्रेष्ठं भवति।

सिक्खधर्मस्य प्रवर्तकः गुरुनानकदेवः पञ्जाबप्रान्ते अभवत्। एकदा सः धर्मप्रचारार्थम् एकं ग्रामम् अगच्छत्। तत्र एकः श्रमिकः गुरुं दृष्ट्वा स्वागतम् अकरोत् एवं च भोजनार्थं रोटिकाः समर्पयत्। एकः उच्चवर्गीयः धनिकः अपि गुरवे मिष्टान्नं अयच्छत्। नानकः किञ्चित् विचार्य श्रमिकस्य रोटिकाः स्वीकृतवान्। एतत् दृष्ट्वा धनिकः सक्रोधम् अवदत्- ''महाराज! किमेतत्? मम गृहात् आनीतं सरसभोजनं त्यक्त्वा भवान् श्रमिकस्य शुष्करोटिकाः स्वीकरोति। एतत् समीचीनं नास्ति। अहं प्रतिष्ठितः अस्मि। भवान् मम अपमानम् अकरोत्। किं मयि गुरुकृपा नास्ति। माम् अपि गौरवान्वितं करोतु।''



गुरुनानकः क्षणं विचार्य मधुरवाण्या अवदत्- ''संसारे जात्या, धनेन च न कोऽपि जनः उच्चः निम्नो वा। सर्वेजनाः समानाः। चरित्रेण एव श्रेष्ठता भवति। श्रमिकेण तु बहुश्रमेण धनं अर्जितम्। अतः तस्य भोजनं पवित्रम् अस्ति। अहं तस्य भोजनं स्वीकृतवान्। गुरुवाणीं श्रुत्वा प्रभावितः धनिकः अभिमानं त्यक्त्वा विनम्रः भूत्वा गुरुचरणयोः भूमौ अपतत्। उक्तं च ''श्रमेण उपार्जिता लक्ष्मीः शुद्धा भवति।''

## शब्दार्थाः

| | | | |
|---|---|---|---|
| प्रवर्तकः | = चलाने वाले | विचार्य | = विचार करके |
| श्रमिकः | = मेहनत करने वाला, मजदूर | अयच्छत् | = दिया |
| गौरवान्वितम् | = धन्य | | |

## अभ्यासः

१. एकपदेन उत्तरं लिखत–

(क) सिक्खधर्मस्य प्रवर्तकः कः?

(ख) गुरुनानकदेवः कस्मिन् प्रान्ते अभवत्?

(ग) श्रमिकः काः समर्पितवान्?

(घ) धनिकः किम् अयच्छत्?

(ङ) गुरुनानकः कस्य भोजनं स्वीकृतवान्?

२. एकवाक्येन उत्तरं लिखत–

(क) गुरुनानकः किमर्थं ग्रामम् अगच्छत्।

(ख) धनिकः किमर्थम् उत्तेजितः अभवत्?

(ग) गुरुः धनिकं किम् उक्तवान्?

(घ) लक्ष्मीः शुद्धा कथं भवति?

(ङ) मनुष्यस्य श्रेष्ठता केन भवति?

३. उचितशब्देन रिक्तस्थानं पूरयत–

(क) ''श्रम एव जयति'' इति ध्येय ............... अस्ति। (वाक्यम्/वाक्यानि)

(ख) श्रमेण ............... उन्नतिः भवति। (राष्ट्रस्य/राष्ट्रात्)

(ग) मम ............. सरसभोजनम् आनीतम्। (गृहं/गृहात्)

(घ) एतत् ................ धनिकः सक्रोधम् अवदत्। (दृष्ट्वा/दृष्टुम्)

(ङ) धनिकस्य भोजनं ................ शुष्करोटिकाः स्वीकृतवान्। (त्यक्त्वा/त्यक्तुम्)

४. उचितं मेलयत–

| | (अ) | (ब) |
|---|---|---|
| (क) | शुष्करोटिका: | मानव: |
| (ख) | मधुरवाण्याम् अवदत् | धनिक: |
| (ग) | चरित्रेण श्रेष्ठ: भवति | श्रमिक: |
| (घ) | मिष्टान्नम् अयच्छत् | गुरुनानक: |

५. क्त्वा प्रत्ययं योजयित्वा वाक्यनिर्माणं कुरुत–

यथा- गुरुनानकदेव: ग्रामं गच्छति, धर्मप्रचारं करोति।

गुरुनानकदेव: ग्रामं गत्वा धर्मप्रचारं करोति।

(क) श्रमिक: गुरुं नमति, भोजनं यच्छति।

(ख) धनिक: गुरुं पश्यति, मिष्टान्नं यच्छति।

(ग) धनिक: गुरुवाक्यं शृणोति, सन्तुष्ट: भवति।

(घ) धनिक: अभिमानं त्यजति, विनम्र: भवति।

## योग्यताविस्तार: –

- ''श्रमस्य महत्त्वम्'' विषयोपरि पञ्च वाक्यानि लिखत।
- श्लोकं स्मरत–

उद्यम:, साहसं, धैर्यं, बुद्धि:, शक्ति:, पराक्रम:।
षडेते यत्र वर्तन्ते, तत्र देव: सहायक:।।